# नमूने के प्रश्न–पत्र की योजना 2011 – 2012

कक्षा – वरिष्ठ उपाध्याय
विषय – संस्कृत वाङ्मय — प्रश्न पत्र –
अवधि – 3.15 होरा — पूर्णांक – 80 अंक

1. उद्देश्य हेतु अंकभार –

| क्र.सं. | उद्देश्य | अंकभार | प्रतिशत |
|---|---|---|---|
| 1. | ज्ञान | 16 | 20 |
| 2. | अवबोध अर्थग्रहण | 24 | 30 |
| 3. | ज्ञानोपयोग / अभिव्यक्ति | 30 | 37 |
| 4. | कौशल / मौलिकता | 10 | 13 |
| | | 80 | 100 |

2. प्रश्नों के प्रकारवार अंकभार –

| क्र. सं. | प्रश्नों का प्रकार | प्रश्नों की संख्या | अंक प्रति प्रश्न | कुल अंक | प्रतिशत | संभावित |
|---|---|---|---|---|---|---|
| 1. | वस्तुनिष्ठ / बहुविकल्पात्मक | – | – | – | – | – |
| 2. | अतिलघूत्तरात्मक | 7 | 1 | 7 | 9 | 10 मिनट |
| 3. | लघूत्तरात्मक – I | 1 | 2 | 2 | 3 | 5 मिनट |
| 4. | लघूत्तरात्मक – II | 3+2=5 | 3x3<br>4x2 | 9<br>8 | 11<br>10 | 25 मिनट |
| 5. | निबंधात्मक | 3+3+1=<br>7 | 5x3<br>10x3 ,<br>9x1 | 15<br>30<br>9 | 18<br>37<br>16 | 140 मिनट |
| | | 20 | | 80 | 100.00 | 170 मिनट |

विकल्प योजना : प्रश्न सं. 12–20 तक आन्तरिक विकल्प है। — पुनरावलोकन :– 10 मिनट
प्रश्नपत्रपठन :– 15 मिनट

3. विषय वस्तु का अंकभार –

| क्र.सं. | विषय वस्तु | अंकभार | प्रतिशत |
|---|---|---|---|
| 1 | लघुसिद्धान्त कौमुदी | 35 | 43.75 |
| 2 | रचना / निबन्ध | 15 | 18.75 |
| 3 | गद्यम् (शिवराजविजयम्) | 15 | 18.75 |
| 4 | पद्यम् (वीरभूमि) | 15 | 18.75 |
| | योग | 80 | 100 |

# प्रश्न–पत्र ब्ल्यू प्रिन्ट

कक्षा – वरिष्ठ उपाध्यायः    विषय :– संस्कृत वाङ्मय    पूर्णांक 80

| क्र. सं. | उद्देश्य इकाई / उप इकाई | ज्ञान | | | | अवबोध | | | | ज्ञानोपयोग / अभिव्यक्ति | | | | कौशल / मौलिकता | | | | योग |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | अति. लघू | लघू | | निबं. | अति. लघू | लघू | | निबं. | अति. लघू | लघू | | निबं. | अति. लघू | लघू | | निबं. | |
| | | | **SA1** | **SA2** | | | **SA1** | **SA2** | | | **SA1** | **SA2** | | | **SA1** | **SA2** | - | |
| 1 | लघुसिद्धान्त कौमुदी | | 2(1) | 3(1) | | | | | | | | | 30(3) | | | | | 35(5) |
| 2 | रचना / निबन्ध | | | | | | | | 5(1) | | | | | | | | 10(2) | 15(3) |
| 3 | गद्यम् (शिवराजविजयम्) | 3(3) | | | | | | 3(1) | 9(1) | | | | | | | | | 15(5) |
| 4 | पद्यम् (वीरभूमि) | 4(4) | | 4(1) | | | | 7(2) | | | | | | | | | | 15(7) |
| 5 | | | | | | | | | | | | | | | | | | |
| 6 | | | | | | | | | | | | | | | | | | |
| | योग | 7(7) | 2(1) | 7(2) | | | | 10(3) | 14(2) | | | | 30(3) | | | | 10(2) | 80(20) |
| | | 16(10) | | | | 24(5) | | | | 30(3) | | | | **10(2)** | | | | 80(20) |

विकल्पों की योजना :– प्रश्न सं. 12 से 20 तक आन्तरिक विकल्प है।

नोटः– कोष्ठक में बाहर की संख्या अंकों की तथा भीतर प्रश्नों की द्योतक है।

हस्ताक्षर

# माध्यमिक शिक्षा बोर्ड राजस्थान, अजमेर

## नमूने का प्रश्न–पत्र

**कक्षा– वरिष्ठ उपाध्याय परीक्षा**

**विषय– संस्कृत वाङ्मय (अनिवार्य)**

अनुक्रमांक ☐☐☐☐☐☐

अवधिः 3:15 होराः | अधिकतमांकाः–80

* परिक्षार्थिभ्यः सामान्यनिर्देशाः *

(i) सर्वे प्रश्ना अनिवार्याः संस्कृतमाध्यमेन समाधेयाश्च सन्ति।

(ii) प्रत्येकं प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम्।

(iii) प्रत्येकं प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखनीयम्।

---

1. शिवराजविजये कस्य यशो गीयते ? 1
2. आमेराधीशः कस्य लालाटिकः आसीत् ? 1
3. सम्प्रति पुण्यनगरे शिवराजाध्युषितचरे महाप्रासादे कः निवसति ? 1
4. वीरभूमिकाव्ये कस्य वर्णनमस्ति ? 1
5. चित्रकूटपर्वतः केन प्रोद्भासितो वर्तते ? 1
6. श्रीनन्दनन्दनस्य चरणाऽरविन्दभ्रमरी का आसीत्? 1
7. चित्रांगदः कस्याः नगर्याः राजाऽसीत् ? 1
8. ''तृतीया सप्तम्योर्बहुलम्'' इति सूत्रस्य सोदाहरणमर्थो लेखनीयः। 2
9. ''नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'' इति सूत्रस्य व्याख्या कार्या। 3
10. शिवराजविजयस्य लेखकस्य रचनोल्लेखपूर्वकं परिचयो लेख्यः। 3
11. वीरभूमिकाव्यस्य रचयितुः रचनाशैलीदृष्ट्या परिचयो लेख्यः। 3
12. अधोलिखितयोरेकस्य श्लोकस्य सप्रसंगव्याख्या विधेया – 4

(क) धर्मः प्रचण्डकलिकालकदर्थनाभिः,

उत्पीडितो विशरणः कृशतामुपेतः।

यं शिश्रिये विजयतां सततं स भूभृन् –

मालाभिरक्षिततमो भूवि मेदपाटः।।

(ख) नानाविधामलमहार्घ्यसुरत्नपूर्णा,

पश्यात्र मौक्तिकमहाविपणिः पुरासीत्।

पण्यं प्रसारितमिह प्रविलोक्य लोकः,

रत्नाकरं विगतरत्नचयं हि मेने।।

13. निम्नलिखितयोरेकस्य श्लोकस्य भावार्थो लेख्य : 4

(क) आसीदनेकमखधूमवितान पूता,

ख्याता पुरी जगति माध्यमिकाभिधाना।

मौर्यान्ववायनलिनीवनभास्कराणाम्,

यासीत्पुरा क्षितिभृतां वर राजधानी।।

(ख) चौलुक्यवंशमुकुटोज्ज्वलचारुहीरो,

दुर्दान्तशक्तिरिह भैरवसिंहवीरः।

द्राग्गुर्जरेश्वरबलं विकलं वितन्वन्।

स्वर्गांगनाकलहकारणतां जगाम।।

14. अधोलिखितेषु पंचानां वाक्यानां संस्कृतभाषायाम् अनुवादो विधेयः 1x5=5

(i) भारतभूमि वीर प्रसूता है।
(ii) जननी और जन्मभूमि स्वर्ग से भी बढ़कर है।
(iii) राम ने रावण को बाण से मारा।
(iv) प्राणायाम से स्वास्थ्य लाभ होता है।
(v) विद्यार्थी गुरुजी को प्रणाम करते हैं।
(vi) रमेश से सुरेश बुद्धिमान है।
(vii) छात्राएँ अध्ययन कर रही थीं।
(viii) बालक क्रीडा मैदान में गेंद से खेलेगा।

15. अधोलिखितेषु कमपि एकं विषयमवलम्ब्य 200 शब्देषु निबन्धं लिखत – 5

(i) दीपमालिकोत्सवः (ii) स्त्रीशिक्षायाः महत्त्वम्
(iii) संस्कृतभाषायाः महत्त्वम् (iv) पर्यावरणसंरक्षणम्

16. निम्नलिखितेषु पंचानां प्रकृतिप्रत्ययानां पदं विधाय वाक्यप्रयोगं कुरुत – 1x5=5

(i) प्रजापति+ण्य (ii) विनिता+ढक्
(iii) दक्ष+इञ् (iv) जन+तल्
(v) कुमुद+ड्मतुप् (vi) चि+यत्
(vii) भिद्+क्त (viii) ग्रह+क

17. निम्नांकितेषु गद्यांशेषु कयोश्चिद् द्वयोः सप्रसंग–व्याख्या विधेया। $4^{1}/_{2} \times 2 = 9$

(क) कोऽयं, कुतोऽयं चरो वा संदेशहरो वा, कपटपथिको वा, अस्मत्पक्षपाती वा, शत्रुपदातिर्वा, कोऽप्युभय पक्षोदासिनो वेति सद्य एवं विज्ञेयम् इति विचारयन्, मन्दिर–पाश्चात्य–प्राचीर–गवाक्षा– दायान्तं कश्चिदस्पष्टालाप– ध्वनिमश्रोषीत्। क्षणं विरम्य च, गवाक्ष–समीपमागत्य, ध्वनिप्रतिध्वनिर्भिरव्यक्तांश– बहुलामप्येवमुक्तिं निश्चिच्ये।

(ख) इतिवक्तारं कमपि कविं व्यक्त–दिल्लीश–द्वारं निजं दिदृक्षुमुत्राऽऽगतमूरीकृत्य, पुनः परिक्रम्य, द्वार–मार्गेण मन्दिरं प्रविश्य, शिवं प्रणम्य घण्टामाहत्य, बिल्व–दलमुत्थाय नेत्रयोः संस्पृश्य शिखायां संस्थाप्य मृत्तिका–शरावस्थं भस्मालिके विलिप्य, प्रदक्षिण–च्छलेन पान्थाध्युषितप्रदेशमागत्य, तेनाऽऽलपन्तं शिवमन्दिराध्यक्षं प्रणम्य, बद्धाज्जलिरागन्तुकमपि– ''कुतः श्री मान्''? कः श्रीमान्? इति सादरं समपृच्छत्।

(ग) चमूपते। दुर्ग्गाण्येव महाराष्ट्राणां बलानि। प्रायस्ते व्यर्थमिति मत्वा कमपि प्रशस्तं भूभागं रणांगणीकृत्य ध्वजान् समुद्धय भेरीराहत्य न योत्स्यन्ते किन्तु परितः पर्वतदरीषु महारण्येषु गिरिगणावृत– दुर्ग्गेषु च निर्भया अवस्थास्यन्ते।

(घ) नास्ति देहोऽपि गेहमपि नामानि मम नामापि मम किंचन। आम्, लोकास्तथाऽपि भाषन्ते (सकासनम्) मां महादेव इति। भगवन् ! अस्मिन्नसारे संसारे देहो वा गेहं वा नाम वा, तादृशं किमास्ते ? यदहं ममेति कथयामि।

18 मार्ग्यः, स्थायी, जनमेजयः, वाहभ्रट्, स्नातं मया, हितम्, विद्वान्, पवित्रम् एषु पंचप्रयोगाः
5x2=10

साधनीयाः।

19. भूतपूर्व, पंचगंगम्, उपराजम्, चोरभयम्, राजपुरुषः, पौर्वशालः, पीताम्बरः, ईशकृष्णौ एषु
5x2=10

पंचप्रयोगानां सिद्धिःकार्या।

20. आदित्यः, शिक्षकः, धार्मिकः, शालेयम्, यतरः, प्रावृषिकः शाब्दिकः, शुक्रियम एषु पंचप्रयोगानां सिद्धिर्विधेया।

5x2=10

वरिष्ठ उपाध्याय परीक्षा

संस्कृतवाड्.मय (अनिवार्य)

प्रश्न–पत्रम्

उत्तरमाला पूर्णांक – 80

| प्रश्न | | अंक |
|---|---|---|
| 1. | शिववीरस्य यशो गीयते। | 1 |
| 2. | अवरंगजीवस्य लालटिकः आसीत्। | 1 |
| 3. | शास्तिखानः निवसति। | 1 |
| 4. | वीरभूमिकाव्ये 'चित्तौड़' इत्यस्य वर्णनमस्ति। | 1 |
| 5. | चित्रकूटपर्वतः पवनचक्रविघट्टनेन प्रोद्वासितो वर्तते। | 1 |
| 6. | मीरा आसीत्। | 1 |
| 7. | चित्राड्.गदः 'चित्रकूट' इति नगर्या राजा आसीन्। | 1 |
| 8. | ''तृतीया–सप्तम्योर्बहुलम्'' – अदन्तादव्ययी भावात् तृतीया सप्तम्योर्बहुलम् अयम् भावः स्यात्। यथा – ''उपकृष्णम्, उपकृष्णेन, उपकृष्णे। | 2 |
| 9. | 'नन्दिग्रहिपचाभ्यो ल्युणिन्यचः' इति सूत्रेण<br>नन्द्यादेर्ल्युः, ग्रह्यादेर्णिनि, पचादेरच् स्यात्<br>यथा – नन्दनः। स्थायी। पचः। | 3 |
| 10. | शिवराजविजयस्य लेखकः पण्डित–अम्बिकादत्तव्यास्य जीवन परिचयः<br>पठित–पाठ्यपुस्तकानुसारेण स्वसंस्कृतभाषायां लेखनीयम् | 3 |
| 11. | वीरभूमिकाव्यस्य लेखक श्री शोभालाल शात्रिणः परिचयः पुस्तकानुसारेण संस्कृतभाषायां लेखनीयम्। | 3 |
| 12. | पद्यभागस्य व्याख्या वीरभूमिकाव्यानुसारेण स्वविवेकानुसारेण लेखनीयः। | 4 |
| 13. | पद्यमेकस्य व्याख्या स्वसंस्कृतभाषायां वीरभूमिकाव्यानुसारेण लेखनीयः। | 4 |
| 14. | अनुवाद कार्या –<br>1. भारतभूमिः वीरप्रसूता अस्ति।<br>2. जननीजन्मभूमिश्च स्वर्गादपि गरीयसी।<br>3. रामेण बाणेन हतो रावणः।<br>4. व्यायामेन स्वास्थ्यलाभो जायते।<br>5. छात्रः गुरुं नमति।<br>6. रमेशात् सुरेशः पटुतरः अस्ति।<br>7. छात्राः अध्ययनशीलाः आसन्।<br>8. बालकः क्रीडाक्षेत्रे क्रीडिष्यति। | 5 |
| 15. | 200 शब्देषु निबन्धः<br>(i). दीपमालिकोत्सवः – मुख्यबिन्दवः<br>1. प्रस्तावना 2. प्रकाशपर्वम् 3. रामेण रावणस्य वधान्तरमयोध्यागमनं वृतान्तम्<br>4. परस्परसम्मेलन पर्व 5. बहवः लाभाः<br>(ii) स्त्री शिक्षायाः महत्त्वम्ः – मुख्यबिन्दवः<br>1. वर्तमानशिक्षायाः स्वरूपं 2. नारीशिक्षायाः आवश्यकता 3. वर्तमानयुगे स्त्री–स्वरूपम् 4. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता 5. उपसंहार<br>(iii) संस्कृत भाषायाः महत्त्वम– मुख्य बिन्दवः<br>1. आर्याणाम् संस्कृति स्वरूपम् 2. संस्कृतभाषायाः उपयोगः 3. साहित्ये, वेदे, धर्मशास्त्रे वेदे वेदांगे संस्कृतस्य प्रयोगः 4. संस्कृतं संस्कृतिश्चैव श्रेयसे समुपास्यताम्<br>5. भाषायाः संरक्षण उपायाः<br>(iv) पर्यावरण संरक्षणम् – प्रमुखा : बिन्दवः<br>1. पर्यावरणस्य प्रमुखा घटकाः 2. पर्यावरणप्रदूषणस्य कारणानि 3. अस्य संरक्षणस्य प्रमुखाः उपायाः 4. पर्यावरण संरक्षेण लाभाः 5. उपसंहार | 5 |
| 16. | पञ्चानां प्रकृतिप्रत्ययानां पदं विधाय वाक्य प्रयोगाणि<br>1. प्रजापति + ण्य = प्राजापत्यः | 5 |

| | | |
|---|---|---|
| | यथा – प्राजापत्यः शासनं करोति।<br>2. विनिता + ढक् = वैनतेयः<br>यथा – अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।<br>3. दक्ष + इञ् = दाक्षि<br>दाक्षिः राज्यं करोति।<br>4. जन + तल् = जनता<br>जनता विद्यमानः अस्ति।<br>5. कुमुद + ड्मतुप् = कुमुद्वान<br>सः प्रदेशः कुमुद्वान् अस्ति।<br>6. चि+यत् = चेयम्<br>वस्तुः चेयम् अस्ति<br>7. मिद + क्त = भिन्नः<br>मया भिन्नः सः।<br>8. ग्रह् + क = गृहम्<br>सः गृहम् गच्छति। | |
| 17. | गद्यभागस्य व्याख्या शिवराजविजयस्य पाठ्यपुस्तानुसारेण लेखनीयः | 9 |
| 18. | पंच प्रयोगाः लघुसिद्धान्त कौमुदी पाठ्यपुस्तकानुसारं स्वविवेकेन कर्त्तव्या कृदन्त प्रकरणे निहिता सन्ति। | 10 |
| 19. | पंच प्रयोगानां रूपसिद्धिः समासनुसारं प्रदत्तसूत्रानुसारं लेखनीयम् । | 10 |
| 20. | पंच प्रयोगानां सिद्धिः पठित तद्धितभागानुसारं सूत्र पुरस्सरं लेखनीयं स्वविवेकेन। | 10 |